| CSM – 44/17 |
|---|
| **Indian Language & Literature in Sanskrit** |
| **Paper – I** |

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*The questions must be answered in Sanskrit using Devanagari Script.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and any **three** of the remaining questions selecting at least **one** from each Section.*

## SECTION – A

Techofworld.In

1. काश्चन त्रीन् विभागान् उत्तरयत : 20×3 = 60

(क) अधोनिर्दिष्टाः संज्ञाः ससूत्रं सोदाहरणञ्च निरूपणीयाः :

(i) वृद्धिः

(ii) संहिता

(iii) सर्वनाम

(iv) टि

(ख) अधोनिर्दिष्टेषु शब्देषु यथास्थानं ससूत्रं सन्धिं सन्धिविच्छेदं वा कुरुत :

(i) अन्वेषणम्

(ii) स्थूलौतुः

(iii) तद्धितम्

(iv) पुरस्कृत्य

(v) अमी + अश्वा

(vi) हिम + ऋतु

(vii) आयुष्कामः

(viii) सखे + आगच्छ

(ix) भवान् + जीवतु

(x) हसन् + आगत

Techofworld.In

(ग) अधोनिर्दिष्टानां पदानां विभक्तिः ससूत्रं साधयत :

(i) बीजाद् अङ्कुरो जायते ।

(ii) इदं मह्यं स्वदते ।

(iii) रुदति शिशौ जगाम ।

(iv) अन्नस्य हेतोर्वसति ।

(v) मासम् अधीते ।

(घ) अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत :

(i) शिशवः पुस्तकं पठन्ति ।

(ii) नियतिः केन बाध्यते ।

(iii) भृत्यः गां ग्रामं नयति ।

(iv) अहं तान् अद्राक्षम् ।

(v) साधुना पापं नाचरिष्यते ।

Techofworld.In

2. ऋग्वेदस्य दार्शनिकसूक्तानां परिचयमेकमुपस्थापयत । 60

3. नैषधं विद्वदौषधम् — सोदाहरणं विश्लेषयत । 60

4. भाषाविज्ञानचर्चायां संस्कृतभाषाया अवदानं निरूपयत । 60

## SECTION – B

5. यथेच्छं त्रयः प्रश्नाः समाधेया : 20×3 = 60

(क) भारतसंस्कृतौ पुरुषार्थानां परिचयमेकमुपस्थापयत ।

(ख) संस्कृतभाषया विरचितानां शिल्पशास्त्रविषयकानां ग्रन्थानां परिचयं प्रदत्त ।

(ग) संस्कृते ज्योतिषशास्त्रविषयकानां ग्रन्थानां विवरणं दत्त ।

(घ) अर्थशास्त्रमनुसृत्य विद्यासमुद्देशमवलम्ब्य निबन्धमेकं रचयत ।

6. वैशेषिकदर्शनसम्मतान् पदार्थान् विश्लेषयत । 60

7. पर्यावरणदूषणं प्रतिकारश्च – इति शीर्षकमवलम्ब्य प्रबन्धमेकं रचयत (प्रायः त्रिशतशब्दैः) । 60

8. गद्यांशममुमाश्रित्य अधः प्रदत्ताः प्रश्नाः समाधेयाः : 60

अस्मिन् संसारे केचन् जना एवं प्रकाराः सन्ति येषां सम्प्रदाय एव पृथग्भूतः । ते पलालाग्निरिव भवन्ति । हठात् प्रज्वलितुमपि पारयन्ति, त्वरितं निर्वातुमपि शक्नुवन्ति । तेषां पृष्ठतः सर्वदैव कस्मैचित् संनह्य स्थातुमावश्यकं भवति य आवश्यकतानुसारं पलालान् सञ्चित्य प्रयच्छेत् । गृहस्थमहिलाः मृद्दीपकस्य सज्जनकाले तत्काये तैलवर्तिकाभ्यां सहैकां काष्ठशलाकामप्यादधते । दीपशिखा यदा मन्दायते तदास्याः क्षुद्रशलाकाया आवश्यकता भवति । अनयैव वर्तिकोपनुद्यते । यद्येवं नाभविष्यत् तदा वर्तिकातैलोपस्थितावपि दीपज्वलनमसम्भाव्यमभविष्यत् । सुरेन्द्रनाथस्य प्रकृतिरप्येवंविधैवास्ति । तस्य बलबुद्धिसाहसानि सर्वाण्येव सन्ति । तथापि स एकाकी किमपि कार्यं सम्पादयितुं न शक्नोति । कार्यस्याल्पांशं स सोत्साहं करोति, किन्तु प्रकृतिगतालस्येन शेषमुज्झित्वा तूष्णीमुपविशति । तदा कस्यचिदेतादृशजनस्यावश्यकता भवति यस्तं प्रणुदेत् ।

**प्रश्नाः**

Techofworld.In

(क) कथं केचन् जनाः पलालाग्निरिव भवन्ति ?

(ख) मृद्दीपकस्य सज्जनकाले काष्ठशलाकादानस्य का आवश्यकता ?

(ग) सुरेन्द्रनाथस्य प्रकृति किंप्रकारा ?

(घ) पलालान् सञ्चित्य प्रयच्छेत् — इत्यस्य किं तात्पर्यम् ?

(ङ) उपनुद्यते – इति क्रियायाः कः अर्थः ?

(च) कः एकाकी किमपि कार्यं सम्पादयितुं न शक्नोति ? कथम् ?